श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवण्शठकोप श्रीश्रीनिवास यतीन्द्र महादेशिकैरनुगृहीतम्

# ॥ श्रीरङ्गनाथ मङ्गळाशासनम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरङ्गनाथ मङ्गळाशासनम् ॥

श्रीनिवास यतीन्द्रादीन् गुरून्नत्वा महात्मनः।
तत्कृपापरतन्त्रोऽहं कुर्वे यत्नं हरेस्स्तुतौ॥ १ ॥

श्रीरङ्गे राजते योऽसौ श्रीरङ्गे यश्च जायते।
तस्य श्रीरङ्गनाथस्य स्तवं कुर्वे यथामति॥ २ ॥

श्रीहस्तलालनानन्दि मृदु पाद सरोरुहे।
सर्वोत्तुङ्गाय नित्यं स्यात् श्रीरङ्गेशाय मङ्गळम्॥ ३ ॥

श्रीनिवास यतीशान गुरुवर्यमवेक्ष्य मे।
सर्वापराधान् क्षन्त्रे स्यात् श्रीरङ्गेशाय मङ्गळम्॥ ४ ॥

श्रीमत्कौस्तुभरत्नाभा भासुरायासुरारये।
भूयात् श्रीवत्सवक्षाय श्रीरङ्गेशाय मङ्गळम्॥ ५ ॥

श्रीरङ्गस्थल वास्तव्य भव्यभाग्य फलात्मने।
आत्मने सर्वतो भूयात् श्रीरङ्गेशाय मङ्गळम्॥ ६ ॥

श्रीमद्वेङ्कटनाथार्य स्तुतिप्रीत हृदेऽनिशम्।
निशीशाय सदा भूयात् श्रीरङ्गेशाय मङ्गळम्॥ ७ ॥

श्रीमदिक्ष्वाकुवंश्यानां कुलार्थाय महात्मनाम्।
सर्वदायार्थिनां भूयात् श्रीरङ्गेशाय मङ्गळम्॥ ८ ॥

श्रीमते निगमान्तैकवेद्यायाशेषशेषिणे।
प्राप्याय प्रापकाय स्यात् श्रीरङ्गेशाय मङ्गळम्॥ ९ ॥

श्री पराङ्कुशयोगीन्द्र पदपद्म निषेवणात्।
लब्धात्मना मयाऽकारि श्रीरङ्गेश्वर मङ्गळम्॥ १० ॥

श्रीनिवास यतीन्द्रोक्तं श्रीरङ्गेश्वर मङ्गळम्।
ये पठन्ति महात्मान स्तेषां भूयात् तु मङ्गळम्॥ ११ ॥

॥ इति श्रीरङ्गनाथ मङ्गळाशासनं संपूर्णम् ॥